तत्र "त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता । अन्त्या नतोत्क्रमज्योना स्वाहोरात्रार्द्धसङ्गुणा । त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः । त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत् । त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्" सू॰सि॰ "उत्तरगोले चरोत्पन्नया ज्यया चरज्ययेत्यर्थः पूर्वचरानयने चरज्यायाश्चरजेति सञ्ज्ञोक्तेः । युक्ता त्रिज्यान्त्या स्यात् । याम्यगोले तया चरज्ययोना त्रिज्यान्त्या स्यात् । नतोत्क्रमज्योना सूर्योदयाद्दिनगतघट्यो दिनशेषघट्यो वा दिनार्धान्तर्गता उन्नतसंज्ञास्ताभिरूनं दिनार्धं नतकालो घट्यात्मकस्तस्मादसुभ्यो लिप्तास्तत्त्वयमैरित्यादिविधिना स्फुनयो रन्ध्रयमला इत्याद्युक्तोत्क्रमज्यापिण्डैर्ज्योत्क्रमज्या । पञ्चदशघट्यधिकनते तु पञ्चदशघट्यूननतस्य क्रमज्याखण्डैः क्रमज्या तया युक्ता त्रिज्योत्क्रमज्या भवति । तया हीनेत्यर्थः । स्वाहोरात्रार्द्धसङ्गुणा । गृहीतचरज्यासम्बन्ध्यहोरात्रवृत्तव्यासार्धं द्युज्या तया गुणिता त्रिज्यया भक्ता फलं छेदसंज्ञः स्यात् । अथानन्तरं छेदो लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलमिष्टकाले शङ्कुः स्यात् । तस्य शङ्कोर्वर्गं त्रिज्यावर्गाच्छोधयेत् । शेषस्य मूलं दृग्ज्या । आभ्यां छायाकर्णौ तु पूर्ववत् पूर्वोक्तरीत्या भवतः । अत्र छायाकर्णौ त्विति कोणच्छायाकर्णसाधनश्लोकान्तभागस्य ग्रहणात् तच्छ्लोकोक्तरीत्याभीष्टशङ्कुदृग्ज्याभ्यां छायाकर्णौ साध्याविल्युक्तम् । अत्रोपपत्तिः । याम्योत्तरवृत्तोर्द्ध्वभागग्रहाधिष्ठितद्युरात्रवृत्तसम्पातात् क्षितिजद्युरात्रवृत्तसम्पातद्वयबद्धोदयास्तसूत्रक्षितिजसम्बद्धयाम्योत्तरवृत्तसूत्रसम्पातपर्यन्तमहोरात्रवृत्ते सूत्रं त्रिज्यानुरूपमन्त्या । सा तूत्तरगोले चरज्यायुता त्रिज्या दक्षिणगोले चरज्ययोना त्रिज्या उन्मण्डलयाम्योत्तरसूत्रावध्यहोरात्रवृत्तव्यासार्धं त्रिज्यात्वात् उन्मण्डलस्योत्तरदक्षिणक्रमेण क्षितिजादूर्ध्वाधःस्थत्वेन तद्याम्योत्तरसूत्रयोर्मध्ये चरज्यात्वाच्च । ग्रहाहोरात्रवृत्ते याम्योत्तराहोरात्रवृत्तसम्पातादुभयत्र नतघट्यन्तरेण स्थाने तत्सूत्रं नतकालस्य सम्पूर्णज्या । तन्मध्यादूर्द्ध्वसूत्रं शररूपं नतोत्क्रमज्या । तया हीनान्त्या ग्रहस्थानादहोरात्रवृत्ते उदयास्तसूत्रपर्यन्तमृजुसूत्रं त्रिज्यानुरूपमिष्टान्त्या । तत्तुल्या याम्योत्तरोर्ध्वव्याससूत्रान्तर्गता सा द्युज्याप्रमाणसाधितेष्टहृतिः । द्युज्यागुणा त्रिज्याभक्ता फलं छेदः । अस्मात् त्रिज्याकर्णे लम्बज्या कोटिस्तदेष्टहृतिकर्णे का कोटिरित्यनुपातेनेष्टशङ्कुः । अस्माद्दृग्ज्याच्छायातत्कर्णौ उक्तरीत्या सिद्धान्तीत्युक्तमुपपन्नम्" रङ्गनाथः ।

**दृग्लम्बन** न॰ सि॰शि॰ उक्ते ग्रहणदर्शनोपयोगिनि दृक्क्षेपस्थलम्बभेदे यथा "इष्टापवर्त्तितां पृथ्वीं कक्षे च शशिसूर्ययोः । भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तयोर्द्वगाम् । तिर्यग्रेखायुतौ कल्प्यं कक्षायां क्षितिजं तथा । ऊर्द्ध्वरेखायुतौ खार्धं दृग्ज्याचापांशकैर्नतौ । कृत्वार्केन्दू समुत्पत्तिं लम्बनस्य प्रदर्शयेत् । एकं भूमध्यतः सूत्रं नयेच्चण्डांशुमण्डलम् । द्रष्टुर्भूपृष्ठगादन्यद्दृष्टिसूत्रं तदुच्यते । कक्षायां सूत्रयोर्मध्ये यास्ता लम्बनलिप्तिकाः । गर्भसूत्रे सदा स्यातां चन्द्रार्कौ समलिप्तिकौ । दृक्सूत्रालम्बितस्त्विन्दुस्तेन तल्लम्बनं स्मृतम् । दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम्" । "यत्र तत्र नतादर्कादधश्चन्द्रावलम्बनम् । तद्दृग्वृत्तेऽन्तरं चन्द्रभान्वोः पूर्वापरं च तत् । पूर्वापरं च याम्योदग्जातं तेनान्तरद्वयम् । कक्षापमण्डलं प्राची तत्तिर्यग्दक्षिणोत्तरा । यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम् । यद्याम्योत्तरभावेन नतिसंज्ञं तदुच्यते । नतिलिप्ता भुजः कर्णो दृग्लम्बनकलास्तयोः । कृत्यन्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः । परलम्बनलिप्ताघ्नी त्रिज्याप्ता रविदृग्ज्यका । दृग्लम्बनकलास्ताः स्युरेवं दृक्क्षेपतो नतिः । गत्यन्तरस्य तिथ्यंशः परलम्बनलिप्तिका । गतियोजनतिथ्यंशः कुदलस्य यतो मितिः । स्युर्लम्बनकला नाड्यो गत्यन्तरलवोद्धृताः । प्रागग्रतो रवेश्चन्द्रः पश्चात् पृष्ठेऽवलम्बितः" सि॰शि॰ ।

**दृग्विष** पुंस्त्री दृशि विषमस्य । दृष्टिविषे सर्पभेदे हेमच॰ । स्त्रियां जातित्वात् ङीष् ।

**दृग्वृत्त** न॰ दृशः प्रचारस्थानं वृत्तमिव । १वृत्ताकारे दृक्प्रचारस्थले । "दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे क्रान्तिवृत्ते ततोऽन्तराभावाद्‌ लम्बनाभावः । याम्योत्तरमन्तरं दृग्लम्बनं नतिरेवोत्पन्ना । दृग्वृत्ताकारक्रान्तिवृत्ते तु दृग्लम्बनमेव क्रान्तिवृत्ते तयोरन्तरमिति लम्बनमुपपन्नं नत्यभावश्च । तथा च दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे त्रिभोनलग्नस्थानेऽसौ भवति तद्वृत्तस्य क्रान्तिवृत्तयाम्योत्तरत्वेनोदयास्तलग्नमध्यवर्त्तित्वेन लग्नस्थानात् त्रिभान्तरितत्वात्" सू॰सि॰टी॰ रङ्गना॰ २दृङ्मण्डले च